# Dakshaprajapatikritam Hamsaguhyam Nama Vishnu Stotram

# દક્ષપ્રજાપતિકૃતં હંસગુહ્યં નામ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Dakshaprajapatikritam Hamsaguhyam Nama Vishnu Stotram

File name : dakShaprajApatikRRitaMhaMsaguhyaMnAmaviShNustotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 6/4/23-34||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2025

*sanskritdocuments.org*

# દક્ષપ્રજાપતિકૃતં હંસગુહ્યં નામ વિષ્ણુસ્તોત્રમ્

પ્રજાપતિરુવાચ ।
નમઃ પરાયાવિતથાનુભૂતયે
ગુણત્રયાભાસનિમિત્તબન્ધવે ।
અદૃષ્ટધામ્ને ગુણતત્ત્વબુદ્ધિભિ-
ર્નિવૃત્તમાનાય દધે સ્વયમ્ભુવે ॥ ૨૩॥

ન યસ્ય સખ્યં પુરુષોઽવૈતિ સખ્યુઃ
સખા વસન્ સંવસતઃ પુરેઽસ્મિન્ ।
ગુણો યથા ગુણિનો વ્યક્તદૃષ્ટે-
સ્તસ્મૈ મહેશાય નમસ્કરોમિ ॥ ૨૪॥

દેહોઽસવોઽક્ષા મનવો ભૂતમાત્રા
નાત્માનમન્યં ચ વિદુઃ પરં યત્ ।
સર્વં પુમાન્ વેદ ગુણાંશ્ચ તજ્જ્ઞો
ન વેદ સર્વજ્ઞમનન્તમીડે ॥ ૨૫॥

યદોપરામો મનસો નામરૂપ-
રૂપસ્ય દૃષ્ટસ્મૃતિસમ્પ્રમોષાત્ ।
ય ઈયતે કેવલયા સ્વસંસ્થયા
હંસાય તસ્મૈ શુચિસદ્મને નમઃ ॥ ૨૬॥

મનીષિણોઽન્તર્હૃદિ સન્નિવેશિતં
સ્વશક્તિભિર્નવભિશ્ચ ત્રિવૃદ્ભિઃ ।
વહ્નિં યથા દારુણિ પાઞ્ચદશ્યં
મનીષયા નિષ્કર્ષન્તિ ગૂઢમ્ ॥ ૨૭॥

સ વૈ મમાશેષવિશેષમાયા-
નિષેધનિર્વાણસુખાનુભૂતિઃ ।
સ સર્વનામા સ ચ વિશ્વરૂપઃ

પ્રસીદતામનિરુક્તાત્મશક્તિઃ ॥ ૨૮॥

યદ્યન્નિરુક્તં વચસા નિરૂપિતં
ધિયાક્ષભિર્વા મનસોઽત યસ્ય ।
મા ભૂત્સ્વરૂપં ગુણરૂપં હિ તત્ત-
ત્સ વૈ ગુણાપાયવિસર્ગલક્ષણઃ ॥ ૨૯॥

યસ્મિન્ યતો યેન ચ યસ્ય યસ્મૈ
યદ્યો યથા કુરુતે કાર્યતે ચ ।
પરાવરેષાં પરમં પ્રાક્પ્રસિદ્ધં
તદ્બ્રહ્મ તદ્ધેતુરનન્યદેકમ્ ॥ ૩૦॥

યચ્છક્તયો વદતાં વાદિનાં વૈ
વિવાદસંવાદભુવો ભવન્તિ ।
કુર્વન્તિ ચૈષાં મુહુરાત્મમોહં
તસ્મૈ નમોઽનન્તગુણાય ભૂમ્ને ॥ ૩૧॥

અસ્તીતિ નાસ્તીતિ ચ વસ્તુનિષ્ઠયો-
રેકસ્થયોર્ભિન્નવિરુદ્ધધર્મયોઃ ।
અવેક્ષિતં કિઞ્ચન યોગસાઙ્ખ્યયોઃ
સમં પરં હ્યનુકૂલં બૃહત્તત્ ॥ ૩૨॥

યોઽનુગ્રહાર્થં ભજતાં પાદમૂલ-
મનામરૂપો ભગવાનનન્તઃ ।
નામાનિ રૂપાણિ ચ જન્મકર્મભિ-
ર્ભેજે સ મહ્યં પરમઃ પ્રસીદતુ ॥ ૩૩॥

યઃ પ્રાકૃતૈર્જ્ઞાનપથૈર્જનાનાં
યથાશયં દેહગતો વિભાતિ ।
યથાનિલઃ પાર્થિવમાશ્રિતો ગુણં
સ ઈશ્વરો મે કુરુતાન્મનોરથમ્ ॥ ૩૪॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે ષષ્ઠસ્કન્ધે ચતુર્થાધ્યાયાન્તર્ગતં
દક્ષપ્રજાપતિકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૬/૪/૨૩-૩૪॥

bhAgavatapurANa . adhyAya 6/4/23-34..

Proofread by PSA Easwaran

*Dakshaprajapatikritam Hamsaguhyam Nama Vishnu Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*